वा॒र॒व॒न्तीये॑नावारयत । वा॒र॒व॒न्तीये॒नेति॑ वार-व॒न्तीये॑न । अ॒वा॒र॒य॒त॒ तत् । तद्वा॑रव॒न्तीय॑स्य । वा॒र॒व॒न्तीय॑स्य वारवन्तीय॒ब्ं॒ । वा॒र॒व॒न्तीय॒स्येति॑ वार-व॒न्तीय॑स्य । वा॒र॒व॒न्तीय॒ ब्ं॒ श्ये॒तेन॑ । वा॒र॒व॒न्तीय॒ब्ं॒ इति॑ वारवन्तीय-ब्ं॒ । श्ये॒तेन॑ श्ये॒ती । श्ये॒ती अ॑कुरुत । अ॒कु॒रु॒त॒ तत् । तच्छ्ये॒तस्य॑ । श्ये॒तस्य॑श्ये॒त ब्ं॒ । श्ये॒त॒ब्ं॒ यत् । श्ये॒त॒ब्ं॒ इति॑ श्येत-ब्ं॒ ()

काण्ड -5, प्रपाठक -5, अनुवाक -8, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। यद्वा॑रव॒न्तिये॑न । वा॒र॒व॒न्तीये॑नो॒ पति॑ष्ठते । वा॒र॒व॒न्तीये॒नेति॑ वार-व॒न्तिये॑न । उ॒पति॑ष्ठते वा॒र॒य॒ते । उ॒पति॑ष्ठत॒ इत्यु॑प-ति॑ष्ठते । वा॒र॒य॒त॒ एव । ए॒वैन॑ । ए॒न॒ग्ं॒ श्ये॒तेन॑ । श्ये॒तेन॑ श्ये॒ती । श्ये॒ती कु॑रुते । कु॒रु॒ते प्र॒जाप॑तेर्?हृ॒दये॑न । प्र॒जाप॑तेर्?हृ॒दये॑ नापिप॒क्षं । अ॒पि॒प॒क्षं प्रति॑ । अ॒पि॒प॒क्षमित्य॑पि-प॒क्षम् । प्रत्युप॑ । उप॑ तिष्ठते । ति॒ष्ठ॒ते प्रे॒माण॑ । प्रे॒माण॑-मे॒व । ए॒वास्य॑ । अ॒स्य॒ ग॒च्छ॒ति॒ । ग॒च्छ॒ति॒ प्राच्या॑ । प्राच्या॑ ब्ं॒ । ब्ं॒ दि॒शा । दि॒शा सा॑दयामि । सा॒द॒या॒मि॒ गा॒य॒त्रेण॑ । गा॒य॒त्रेण॒ छन्द॑सा । छन्द॑साऽग्नि॒ना॑ । अ॒ग्नि॒ना॑ दे॒व॒त॑या । दे॒व॒त॑याऽग्नेः । अ॒ग्नेश्शी॑र्ष्णा । शी॒र्ष्णाऽग्नेः । अ॒ग्नेश्शिरः॑ । शिर॒ उप॑ । उप॑ दधामि । दधामि॒ दक्षि॑णया । दक्षि॑णया ब्ं॒ । ब्ं॒ दि॒शा । दि॒शा सा॑दयामि । सा॒द॒या॒मि॒ त्रैष्टु॑भेन । त्रैष्टु॑भेन॒ छन्द॑सा । छन्द॒सेन्द्रे॑ण । इन्द्रे॑ण दे॒व॒त॑या । दे॒व॒त॑याऽग्नेः । अ॒ग्नेः प॒क्षेण॑ । प॒क्षेणा॒ग्ने । अ॒ग्नेः प॒क्षं । प॒क्षमुप॑ । उप॑ दधामि । दधामि॒ प्रती॑च्या॑ । प्रती॑च्या॑ ब्ं॒ । ब्ं॒ दि॒शा । दि॒शा सा॑दयामि । सा॒द॒या॒मि॒ जाग॑तेन ()

काण्ड -5, प्रपाठक -5, अनुवाक -8, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। जाग॑तेन॒ छन्द॑सा । छन्द॑सा स॒वि॒त्रा । स॒वि॒त्रा दे॒व॒त॑या । दे॒व॒त॑याऽग्नेः । अ॒ग्नेः पु॒च्छे॑न । पु॒च्छे॑नाग्नेः । अ॒ग्नेः पु॒च्छ॑म् । पु॒च्छ॒मुप॑ । उप॑ दधामि । दधाम्युदी॑च्या । उदी॑च्या ब्ं॒ । ब्ं॒ दि॒शा । दि॒शा सा॑दयामि । सा॒द॒या॒म्यानु॑ष्टुभेन । आनु॑ष्टुभेन॒ छन्द॑सा । आनु॑ष्टुभे॒नेत्यानु॑-स्तुभेन । छन्द॑सा मि॒त्रा॒व॒रु॒णाभ्या॑ । मि॒त्रा॒व॒रु॒णाभ्या॑ दे॒व॒त॑या । मि॒त्रा॒व॒रु॒णाभ्या॒मिति॑

मित्रा-वरुणाभ्यां । देवतयाऽग्नेः । अग्नेः पक्षेण । पक्षेणाग्नेः । अग्नेः पक्षम् । पक्षमुप । उप दधामि । दधाम्यूर्ध्वया । ऊर्ध्वया बा । बा दिशा । दिशा सादयामि । सादयामि पाङ्क्तेन । पाङ्क्तेन छन्दसा । छन्दसा बृहस्पतिना । बृहस्पतिना देवतया । देवतयाऽग्नेः । अग्नेः पृष्ठेन । पृष्ठेनाग्नेः । अग्नेः पृष्ठं । पृष्ठमुप । उप दधामि । दधामि यः । यो वै । वा अपात्मानं । अपात्मानमग्निं । अपात्मानमित्यप-आत्मानम् । अग्निं चिनुते । चिनुतेऽपात्मा । अपात्माऽमुष्मिन्न् । अपात्मेत्यप-आत्मा । अमुष्मिंल्लोके । लोके भवति । भवति यः । यस्सात्मानं । सात्मानं चिनुते । सात्मानमिति स-आत्मानम् । चिनुते सात्मा । सात्माऽमुष्मिन्न् । सात्मेति स-आत्मा । अमुष्मिंल्लोके । लोके भवति । भवत्यात्मेष्टकाः । आत्मेष्टका उप । आत्मेष्टका इत्यात्म-इष्टकाः । उप दधाति । दधात्येषः । एष वै । वा अग्नेः । अग्नेरात्मा । आत्मा सात्मानं । सात्मानमेव । सात्मानमिति स-आत्मानम् । एवाग्निं । अग्निं चिनुते । चिनुते सात्मा । सात्माऽमुष्मिन्न् । सात्मेति स-आत्मा । अमुष्मिंल्लोके । लोके भवति । भवति यः । य एवं । एवं वेद । वेदेति वेद () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

अग्न उदधे । उदधे या । उदध इत्युद-धे । या तै । त इषुः । इषुर्युवा । युवा नाम । नाम तया । तया नः । नो मृड । मृड तस्याः । तस्यास्ते । ते नमः । नमस्तस्याः । तस्तास्ते । त उप । उप जीवन्तः । जीवन्तो भूयास्म । भूयास्माग्नै । अग्ने दुध्र । दुध्र गह्य । गह्य किꣳशिल । किꣳशिल वन्य । वन्य या । या तै । त इषुः । इषुर्युवा । युवा नाम । नाम तया । तया नः । नो मृड । मृड तस्याः । तस्यास्ते । ते नमः । नमस्तस्याः । तस्यास्ते । त उप । उप जीवन्तः । जीवन्तो भूयास्म । भूयास्म पंच । पंच वै । वा एते । एतैऽग्नयः । अग्नयो यत् । यच्चितयः । चितय उदधिः । उदधिरेव । उदधिरित्युद-धिः । एव नाम । नाम प्रथमः । प्रथमो दुध्रः । दुध्रो द्वितीयः ()

काण्ड -5, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। द्वितीयो गह्यः । गह्यस्तृतीयः । तृतीयः किꣳशिलः । किꣳशिलश्चतुर्थः । चतुर्थो वन्यः । वन्यः पंचमः । पंचमस्तेभ्यः । तेभ्यो यत् । यदाहुतीः । आहुतीर्न । आहुतीरित्या-हुतीः । न जुहुयात् । जुहुयादध्वर्युं । अध्वर्युं च । च यजमानम् । यजमानम् च । च प्र । प्र दहेयुः । दहेयुर्यत् । यदेताः । एता आहुतीः । आहुती- र्जुहोति । आहुतीरित्या-हुतीः । जुहोति भागधेयेन । भागधेयेनैव । भागधेयेनेति भाग-धेयेन । एवैनान् । एनाꣳशमयति । शमयति न । नार्तिम् । आर्तिमा । आर्च्छति । ऋच्छत्यध्वर्युः । अध्वर्युर्न । न यजमानः । यजमानो वाक् । वाङ्मे । म आसन् । आसन्नसोः । नसोः प्राणः । प्राणोऽक्ष्योः । प्राण इति प्र-अनः । अक्ष्योश्चक्षुः । चक्षुः कर्णयोः । कर्णयोः श्रोत्रम् । श्रोत्रं बाहुवोः । बाहुवोर्बलम् । बलमूरुवोः । ऊरुवोरोजः । ओजोऽरिष्टा । अरिष्टा विश्वानि । विश्वान्यंगानि । अंगानि तनूः ॥ तनूस्तनुवा ()

काण्ड -5, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। तनुवा मे । मे सह । सह नमः । नमस्ते । ते अस्तु । अस्तु मा । मा माम् । मा हिꣳसीः । हिꣳसीरप । अप वै । वा एतस्मात् । एतस्मात्प्राणाः । प्राणाः क्रामन्ति । प्राणा इति प्र-अनाः । क्रामन्ति यः । योऽग्निं । अग्निं चिन्वन् । चिन्वन्नधिक्रामति । अधि क्रामति वाक् । अधिक्रामतीत्यधि-क्रामति । वाङ्मे । म आसन् । आसन्नसोः । नसोः प्राणः । प्राण इति । प्राण इति प्र- अनः । इत्याह । आह प्राणान् । प्राणानेव । प्राणानिति प्र-अनान् । एवात्मन् । आत्मन्धत्ते । धत्ते यः । यो रुद्रः । रुद्रो अग्नौ । अग्नौ यः । यो अप्सु । अप्सु यः । अप्सित्यप्-सु । य ओषधीषु । ओषधीषु यः । यो रुद्रः । रुद्रो विश्वा । विश्वा भुवना । भुवनाऽऽविवेश । आविवेश तस्मै । आविवेशेत्या-विवेश । तस्मै रुद्राय । रुद्राय नमः । नमो अस्तु । अस्वाहुति भागाः । आहुति भागा वै । आहुति भागा इत्याहुति-भागः । वा अन्ये । अन्ये रुद्राः । रुद्रा हविर्भागाः । हविर्भागा अन्ये । हविर्भागा इति हविः-भागाः ()

काण्ड -5, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। अन्ये शंतरुद्रीयँ । शतरुद्रीयꣳ हुत्वा । शतरुद्रीयमितिं शत-रुद्रीयँ । हुत्वा गांवीधुकं । गावीधुकं चरुं । चरुमेतेनं । एतेन यजुंषा । यजुंषा चरमायाँ । चरमायामिष्टकायां । इष्टकायां नि । नि दंध्यात् । दध्याद्भाग धेयेंन । भागधेयेंनैव । भागधेयेनेतिं भाग-धेयेंन । एवैनँ । एनꣳ शमयति । शमयति तस्यं । तस्य तु । त्वे । वै शंतरुद्रीयँ । शतरुद्रीयꣳ हुतं । शतरुद्रीयमितिं शत-रुद्रीयँ । हुतमितिं । इत्यांहुः । आहुर्यस्यं । यस्यै तत् । एतदग्नौ । अग्नौ क्रियतैँ । क्रियत इतिं । इति वसंवः । वसंवस्त्वा । त्वा रुद्रैः । रुद्रैः पुरस्ताँत् । पुरस्ताँत्पान्तु । पान्तु पितरंः । पितरंस्त्वा । त्वा यमरांजानः । यमरांजानः पितृभिंः । यमरांजान इतिं यम-राजानः । पितृभिर्दक्षिणतः । पितृभिरितिं पितृ-भिः । दक्षिणतः पाँतु । पांत्वादित्याः । आदित्यास्त्वाँ । त्वा विश्वैँः । विश्वैर्देवैः । देवैः पश्चात् । पश्चात्पाँन्तु । पांतु दुतानः । दुतानस्त्वाँ । त्वा मारुतः । मारुतो मरुद्भिंः । मरुद्भिरुत्तरतः । मरुद्भिरितिं मरुत्-भिः । उत्तरतः पांतु । उत्तरत इत्युत्-तरतः । पातु देवाः ()

काण्ड -5, प्रपाठक -5, अनुवाक -9, अनुवाक सूक्तम -5,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। देवास्त्वाँ । त्वेन्द्रंज्येष्ठाः । इन्द्रंज्येष्ठा वरुंणराजानः । इन्द्रंज्येष्ठा इतीन्द्रं-ज्येष्ठाः । वरुंणराजनोऽधस्ताँत् । वरुंणराजान इति वरुंण-राजानः । अधस्ताँच्च । चोपरिंष्टात् । उपरिंष्टाच्च । च पान्तु । पान्तु न । न वै । वा एतेनं । एतेनं पूतः । पूतो न । न मेध्यंः । मेध्यो न । न प्रोक्षितः । प्रोक्षितो यत् । प्रोक्षित इति प्र-उक्षितः । य देंनं । एनमतंः । अतंः प्राचीनँ । प्राचीनं प्रोक्षतिं । प्रोक्षति यत् । प्रोक्षतीतिं प्र-उक्षतिं । यथ्संचितं । संचितमाज्येंन । संचितमिति सं-चितम् ।

आज्येन प्रोक्षति । प्रोक्षति तेन । प्रोक्षतीति प्र-उक्षति । तेन पूतः । पूतस्तेन । तेन मेध्यः । मेध्यस्तेन । तेन प्रोक्षितः । प्रोक्षित इति प्र-उक्षितः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

समीची नाम । नामाऽसि । असि प्राची । प्राची दिक् । दिक्तस्याः । तस्यास्ते । तेऽग्निः । अग्निरधिपतिः । अधिपतिरसितः । अधिपतिरित्यधि-पतिः । असितो रक्षिता । रक्षिता यः । यश्च । चाधिपतिः । अधिपतिर्यः । अधिपतिरित्यधि-पतिः । यश्च । च गोप्ता । गोप्ता ताभ्यः । ताभ्यां नमः । नमस्तो । तो नः । नो मृडयताम् । मृडयतां ते । ते यम् । यं द्विष्मः । द्विष्मो यः । यश्च । च नः । नो द्वेष्टि । द्वेष्टि तं । तं वः । वां जम्भे । जम्भे दधामि । दधाम्योजस्विनी । ओजस्विनी नाम । नामासि । असि दक्षिणा । दक्षिणा दिक् । दिक्तस्याः । तस्यास्ते । त इन्द्रः । इन्द्रोऽधिपतिः । अधिपतिः पृदाकुः । अधिपतिरित्यधि-पतिः । पृदाकुः प्राची । प्राची नाम । नामाऽसि । असि प्रतीची । प्रतीची दिक् । दिक्तस्याः । तस्यास्ते ()

काण्ड -5, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। ते सोमः । सोमोऽधिपतिः । अधिपतिस्स्रुजः । अधिपतिरित्यधि-पतिः । ःस्रुजोऽवस्थावः । स्रुज इति स्रु-जः । अवस्थावा नाम । अवस्थावेत्यव-स्थावः । नामाऽसि । अस्युदीचि । उदीची दिक् । दिक्तस्याः । तस्यास्ते । ते वरुणः । वरुणोऽधिपतिः । अधिपति-स्तिरश्चराजिः । अधिपतिरित्यधि-पतिः । तिरश्चराजिरधिपत्नी । तिरश्चराजिरिति तिरश्च-राजिः । अधिपत्नी नाम । अधिपत्नीत्यधि-पत्नी । नामाऽसि । असि बृहती । बृहती दिक् । दिक्तस्याः । तस्यास्ते । ते बृहस्पतिः । बृहस्पतिरधिपतिः । अधिपतिः श्वित्रः । अधिपतिरित्यधि-पतिः । श्वित्रो वशिनी । वशीनी नाम । नामाऽसि ।

अ॒सी॒यं । इ॒यं दिक् । दिक्तस्याँः । तस्माँस्ते । ते॒ यमः । यमोऽधिपतिः । अधिपतिः कृ॒ल्माष॑ग्रीवः । अधिपतिरित्यधि-पतिः । कृ॒ल्माष॑ग्रीवो रक्षिता । कृ॒ल्माष॑ग्रीव इति॑ कृ॒ल्माष॑-ग्रीवः । र॒क्षि॒ता यः । यश्च॑ । चाधिपतिः । अधिपतिर्यः । अधिपतिरित्यधि-पतिः । यश्च॑ । च॒ गोप्ता । गोप्ता ताभ्याँ । ताभ्या॑ नमः॑ । नम॒स्तौ । तौ नः॑ । नो॒ मृ॒ड॒यता॒म् । मृ॒ड॒यता॑ ते । ते यम् । यं द्वि॒ष्मः । द्वि॒ष्मो यः । यश्च॑ । च॒ नः॒ ()

काण्ड -5, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। नो॒ द्वेष्टि॑ । द्वेष्टि॒ तं । तं वाँ । वा॒ ज॑भँ । ज॑भे॑ दधामि । द॒धा॒म्येताः । ए॒ता वै । वै दे॒वताँः । दे॒वता॑ अ॒ग्निं । अ॒ग्निं चि॒तं । चि॒त॑ꣳ रक्षन्ति । र॒क्ष॒न्ति॒ ताभ्यः॑ । ताभ्यो यत् । यदाहु॑तीः । आहु॑तीर्न । आहु॑तीरित्या-हुतीः । न जुहुयात् । जुहुया द॑ध्वर्यु । अ॒ध्व॒र्यु॑ च॑ । च॒ यज॑मानम् । यज॑मानं च । च॒ ध्या॒येयुः॑ । ध्या॒येयु॒र्यत् । य दे॒ताः । ए॒ता आहु॑तीः । आहु॑तीर्जुहोति॑ । आहु॑तीरित्या-हुतीः । जुहोति॑ भाग॒धेये॑न । भा॒ग॒धेये॑नै॒व । भा॒ग॒धेये॑नेति॑ भाग-धेये॑न । ए॒वैनान्॑ । ए॒नां॒श्च॒मय॑ति । श॒मय॑ति न । नार्ति॑ । आर्ति॒मा । आर्च्छ॑ति । ऋच्छ॒त्यध्व॒र्युः॑ । अ॒ध्व॒र्यु॒र्न । न यज॑मानः । यज॑मानो हे॒तयः॑ । हे॒तयो॒ नाम॑ । नाम॑ स्थ । स्थ तेषाँ । तेषाँ वः । वः पुरः । पुरो गृ॒हाः । गृ॒हा अ॒ग्निः । अ॒ग्निर्वः॑ । व॒ इ॒ष॑वः । इ॒ष॑वस्सलि॒लः । स॒लि॒लो नि॑लि॒म्पाः । नि॒लि॒म्पा नाम॑ । नि॒लि॒म्पा इति॑ नि-लि॒म्पाः । नाम॑ स्थ ()

काण्ड -5, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। स्थ तेषाँ । तेषाँ वः । वो॒ दक्षि॑णा । दक्षि॑णा गृ॒हाः । गृ॒हाः पि॒तरः॑ । पि॒तरो॑ वः । व॒ इ॒ष॑वः । इ॒ष॑व॒- स्सग॑रः । सग॑रो व॒ज्रिणः॑ । व॒ज्रिणो॒ नाम॑ । नाम॑ स्थ । स्थ तेषाँ । तेषाँ वः । वः प॒श्चात् । प॒श्चाद्गृ॒हाः । गृ॒हास्स्व॒प्नः॑ । स्व॒प्नो॑ वः । व॒ इ॒ष॑वः । इ॒ष॑वो॒ गह्व॑रः । गह्व॑रोऽवस्थावा॑नः । अ॒व॒स्थावा॑नो॒ नाम॑ । अ॒व॒स्थावा॑न॒ इत्य॑व-स्थावा॑नः । नाम॑ स्थ । स्थ

तेषाँ । तेषाँ वः । व उत्तरात् । उत्तराद्धाः । उत्तरादित्युत्- तरात् । गृहा आपः । आपो वः । व इषवः । इषवस्समुद्रः । समुद्रोऽधि- पतयः । अधिपतयो नाम । अधिपतय इत्यधि-पतयः । नाम स्थ । स्थ तेषाँ । तेषाँ वः । व उपरि । उपरि गृहाः । गृहा वर्?षं । वर्?षं वः । व इषवः । इषवोऽवस्वान् । अवस्वान्क्रव्याः । क्रव्या नाम । नाम स्थ । स्थ पार्थिवाः । पार्थिवास्तेषाँ । तेषाँ वः । व इह । इह गृहाः । गृहा अन्नँ ()

काण्ड -5, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -5,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। अन्न वः । व इषवः । इषवो निमिषः । निमिषो वातनाम । निमिष इति नि-मिषः । वातनामं तेभ्यः । वातनाममिति वात-नामम् । तेभ्यो वः । वो नमः । नमस्ते । ते नः । नो मृडयत । मृडयत ते । ते यं । यं द्विष्मः । द्विष्मो यः । यश्च । च नः । नो द्वेष्टि । द्वेष्टि तं । तं वः । वो जंभै । जंभे दधामि । दधामि हुतादः । हुतादो वै । हुताद इति हुत-अदः । वा अन्ये । अन्ये देवाः । देवा अहुतादः । अहुतादोऽन्ये । अहुताद इत्यहुत-अदः । अन्ये तान् । तानग्निचित् । अग्निचिदेव । अग्निचिदित्यग्नि-चित् । एवोभयान् । उभयाँन्प्रीणाति । प्रीणाति दध्ना । दध्ना मधुमिश्रेण । मधुमिश्रेणैताः । मधुमिश्रेणेति मधु-मिश्रेण । एता आहुतीः । आहुतीर्जुहोति । आहुतीरित्या-हुतीः । जुहोति भागधेयेन । भागधेयेनैव । भागधेयेनेति भाग-धेयेन । एवैनान् । एनान्प्रीणाति । प्रीणात्यथौ । अथो खलु । अथो इत्यथौ । खल्वाहुः । आहुरिष्टकाः । इष्टका वै । वै देवाः । देवा अहुतादः । अहुताद इति । अहुताद इत्यहुत-अदः । इत्यनुपरिक्रामँ ()

काण्ड -5, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -6,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। अनुपरिक्रामं जुहोति । अनुपरिक्राममित्यनु-परिक्रामँ । जुहोत्यपरिवर्गं । अपरिवर्ग-मेव । अपरिवर्गमित्यपरि-वर्गं । एवैनान् । एनान्प्रीणाति । प्रीणातीमम् । इमꣳ स्तनँ । स्तनमूर्जस्वंतं । ऊर्जस्वंतं धय । धयापां । अपां प्रप्यांतम् । प्रप्यांतमग्ने । प्रप्यांतमिति प्र-प्यातम् । अग्ने सरिरस्य । सरिरस्य मध्यै । मध्य इति मध्यै ॥ उथ्सं जुषस्व । जुषस्व मधुमन्तं । मधुमंत-मूर्व । मधुमन्तमिति मधु-मन्तं । ऊर्व समुद्रियँ । समुद्रियꣳ सदनम् । सदनमा । आ विशस्व । विशस्वेति विशस्व ॥ यो वै । वा अग्निं । अग्निं प्रयुज्य । प्रयुज्य न । प्रयुज्येति प्र-युज्य । न विमुंचति । विमुंचति यथाँ । विमुंचतीति वि-मुंचतिँ । यथाऽश्वः । अश्वो युक्तः । युक्तोऽविमुच्यमानः । अविमुच्यमानꣳ, क्षुध्यन्न् । अविमुच्यमान इत्यवि-मुच्यमानः । क्षुध्यन्नराभवति । पराभवत्येवं । पराभवतीति परा-भवति । एवमस्य । अस्याग्निः । अग्निः परा ँ । परा भवति । भवति तं । तं पराभवन्तं । पराभवन्तं यजमानः । पराभवन्तमिति । परा-भवन्तं । यजमानोऽनु । अनु परा ँ । परा भवति । भवति सः । सौऽग्निं । अग्निं चिन्वा । चिन्वा लूक्षो । लूक्षो भवति ()

काण्ड -5, प्रपाठक -5, अनुवाक -10, अनुवाक सूक्तम -7,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। भवतीमम् । इमꣳ स्तनँ । स्तनमूर्जस्वन्तं । ऊर्जस्वन्तं धय । धयापां । अपामिति । इत्याज्यस्य । आज्यस्य पूर्णां । पूर्णाꣳ स्रुचँ । स्रुचं जुहोति । जुहोत्येषः । एष वै । वा अग्नेः । अग्नेर्विमोकः । विमोको विमुच्य । विमोक इति वि-मोकः । विमुचैव । विमुच्येति वि-मुच्य । एवास्मैँ । अस्मा अन्नँ । अन्नमपि । अपि दधाति । दधाति तस्मात् । तस्मादाहुः । आहुर्यः । यश्च । चैवं । एवं वेद । वेद यः । यश्च । च न । न सुधायँ । सुधायꣳ ह । सुधायमिति सु- धायँ । ह वै । वै वाजी । वाजी सुहितः । सुहितो दधाति । सुहित इति सु-हितः । दधातीति । इत्यग्निः । अग्निर्वाव । वाव वाजी । वाजी तम् । तमेव । एव तत् । तत्प्रीणाति । प्रीणाति सः । स एनं । एनं प्रीतः । प्रीतः प्रीणाति । प्रीणाति वसीयान् । वसीयान्भवति । भवतीति भवति () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -11, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

इंद्रा॑य॒ राज्ञै॑ । राज्ञे॑ सू॒क॒रः । सू॒क॒रो व॒रु॒णाय । व॒रु॒णाय॒ राज्ञै॑ । राज्ञे॑ कृ॒ष्णः । कृ॒ष्णो॑ य॒माय॑ । य॒माय॒ राज्ञै॑ । राज्ञ॑ ऋ॒श्यः॑ । ऋ॒श्य॑ ऋ॒ष॒भाय॑ । ऋ॒ष॒भाय॒ राज्ञै॑ । राज्ञे॑ गव॒यः । ग॒व॒यश्चा॑र्दू॒लाय॑ । शा॒र्दू॒लाय॒ राज्ञै॑ । राज्ञे॑ गौ॒रः । गौ॒रः पु॑रुषरा॒जाय॑ । पु॒रु॒ष॒रा॒जाय॑ मर्क॒टः॑ । पु॒रु॒ष॒रा॒जायेति॑ पुरुष-रा॒जाय॑ । म॒र्क॒टः॑, क्षिप्र॒श्येन॑स्य॑ । क्षिप्र॒श्येन॑स्य॒ वर्ति॑का । क्षिप्र॒श्येन॑स्येति॑ क्षिप्र-श्येन॑स्य॑ । वर्ति॑का॒ नील॑ङ्गोः । नील॑ङ्गो॒ः क्रिमिः॑ । क्रिमि॒स्सोम॑स्य । सोम॑स्य॒ राज्ञः॑ । राज्ञः॑ कुलुञ्जः । कु॒लु॒ञ्ज॒स्सिंधौ॑ । सिंधौ॑श्चि॒ꣳशु॒मारः॑ । शि॒ꣳशु॒मारो॑ हि॒मव॑तः । हि॒मव॑तो ह॒स्ती । हि॒मव॑त॒ इति॑ हि॒म-व॒तः॒ । ह॒स्ती इति॑ ह॒स्ती () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -12, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

मयुः॑ प्रा॑जापत्यः । प्राजापत्य ऊ॒लः॒ । प्राजापत्य इति॑ प्राजा-पत्यः॒ । ऊ॒लो ह॒लीक्ष्णः॑ । ह॒लीक्ष्णो॑ वृषद॒ꣳशः॑ । वृ॒ष॒द॒ꣳश॒स्ते । ते धा॒तुः॒ । धा॒तु स्स॑र॑स्व॒त्यै॒ । स॒र॑स्व॒त्यै॒ शौरिः॑ । शौरि॑श्श्ये॒ता । श्ये॒ता॑पुरुषवाक् । पु॒रु॒ष॒वाक्स॑र॑स्व॒ते । पु॒रु॒ष॒वागिति॑ पुरुष-वाक् । स॒र॑स्व॒ते शु॒कः॑ । शु॒कश्श्ये॒तः॒ । श्ये॒तः पु॑रुषवाक् । पु॒रु॒ष॒वागा॑र॒ण्यः॑ । पु॒रु॒ष॒वागिति॑ पुरुष-वाक् । आ॒र॒ण्यो॑जः । अ॒जो न॑कु॒लः॒ । न॒कु॒लश्चका॑ । शका॒ ते । ते॒ पौ॒ष्णाः॒ । पौ॒ष्णा वा॒चे । वा॒चे क्रौं॒चः॒ । क्रौं॒च इति॑ क्रौं॒चः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -13, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

अ॒पां नप्त्रै॑ । नप्त्रे॑ जु॒षः॒ । जु॒षो नाक्रः॑ । नाक्रो मक॑रः॒ । मक॑रः कुली॒कय॑ः । कु॒ली॒कय॒स्ते । तेऽकू॑पारस्य । अकू॑पारस्य वा॒चे । वा॒चे पैङ्गरा॒जः॒ । पै॒ङ्ग॒रा॒जो भगा॑य । पै॒ङ्ग॒रा॒ज इति॑ पैङ्ग-रा॒जः॒ । भगा॑य कुपी॒त॑कः । कु॒पी॒त॑क आ॒ती

। आ॒ती वा॑ह॒सः । वा॒ह॒सो द॑र्वि॒दा । द॒र्वि॒दा ते । ते वा॑य॒व्या᳖ः । वा॒य॒व्या॑ दि॒ग्भ्यः । दि॒ग्भ्यश्च॑क्रवा॒कः । दि॒ग्भ्य इति॑ दिक्-भ्यः । च॒क्र॒वा॒क इति॑ चक्रवाकः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -14, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

बला॑याजग॒रः । अ॒ज॒ग॒र आ॑खु॒ः । आ॒खु॒स्मृ॑ज॒या । मृ॒ज॒याश्च॑यण्ड॑कः । श्च॒य॒ण्ड॒क॒स्ते । ते॒ मै॒त्राः । मै॒त्रा मृ॒त्यवै᳖ । मृ॒त्यवे॑ऽसि॒तः । अ॒सि॒तो म॒न्यवै᳖ । म॒न्यवै᳖ स्रु॒जः । स्रु॒जः कु॑ंभी॒नस॑ः । स्रु॒ज इति॑ स्रु॒जः । कु॒ंभी॒नस॑ः पुष्करसा॒दः । कु॒ंभी॒नस॒ इति॑ कुंभी-नस॑ः । पु॒ष्क॒र॒सा॒दो लो॑हि॒ताहिः । पु॒ष्क॒र॒सा॒द इति॑ पुष्कर-सा॒दः । लो॒हि॒ताहि॒स्ते । लो॒हि॒ताहि॑रिति॑ लोहित-अ॒हिः । ते ब्रा॒ष्ट्राः । ब्रा॒ष्ट्राः प्र॑ति॒श्रुत्का॑ये । प्र॒ति॒श्रुत्का॑ये वाह॒सः । प्र॒ति॒श्रुत्का॑या इति॑ प्रति-श्रुत्का॑ये । वा॒ह॒स इति॑ वाह॒सः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -15, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

पु॒रु॒षमृ॒गश्च॒न्द्रम॑से । पु॒रु॒ष॒मृ॒ग इति॑ पुरुष-मृ॒गः । च॒न्द्रम॑से गो॒धा । गो॒धा काल॑का । काल॑का दार्वाघा॒टः । दा॒र्वा॒घा॒टस्ते । दा॒र्वा॒घा॒ट इति॑ दारु-आ॒घा॒तः । ते व॒न॒स्प॒ती॑नाम् । व॒न॒स्प॒ती॑नामे॒णी । ए॒ण्य॑ह्वै᳖ । अ॒ह्वे कृ॒ष्ण॑ः । कृ॒ष्णो रात्रि॑यै । रात्रि॑यै पि॒कः । पि॒कः, क्ष्विङ्का᳖ । क्ष्विङ्का नील॑शीर्ष्णी । नील॑शीर्ष्णी ते । नील॑शीर्ष्णी॒ति॒ नील॑-शी॒र्ष्णी॒ । तै᳖ऽर्य॒म्णे । अ॒र्य॒म्णे धा॒तुः । धा॒तुः क॑त्क॒टः । क॒त्क॒ट इति॑ कत्क॒टः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -16, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

सौरी बलाकाँ । बलाकर्श्यः । ऋश्यो मयूरः । मयूरश्येनः । श्येनस्ते । ते गन्धर्वाणाँ । गन्धर्वाणां वसूनां । वसूनां कपिंजलः । कपिंजलो रुद्राणाँ । रुद्राणाँ तित्तिरिः । तित्तिरी रोहित् । रोहित्कुण्डृणाचीँ । कुण्डृणाचीं गोलत्तिका । गोलत्तिका ताः । ता अप्सरसाँ । अप्सरसा मरण्याय । अरण्याय सृमरः । सृमर इतिं सृमरः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -17, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

पृषतो वैँश्वदेवः । वैश्वदेवः पिब्बः । वैश्वदेव इतिं वैश्व-देवः । पिब्बो न्यङ्कुः । न्यङ्कुः कशः । कशस्ते । तेऽनुमत्यै । अनुमत्या अन्यवापः । अनुमत्या इत्यनु-मत्यै । अन्यवापौँऽर्धमासानाँ । अन्यवाप इत्यन्य-वापः । अर्धमासानाँ मासां । अर्धमासानामित्यर्ध-मासानाँ । मासां कश्यपः । कश्यपः क्रयिः । क्रयिः कुटरुः । कुटरुर्दात्यौहः । दात्यौहस्ते । ते सिनीवाल्यै । सिनीवाल्यै बृहस्पतये । बृहस्पतये शित्पुटः । शित्पुट इतिं शित्पुटः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -18, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

शका भौमी । भौमी पात्रः । पात्रः कशः । कशो मान्थीलवः । मान्थी-लवस्ते । ते पितृणां । पितृणामृतूनां । ऋतूनां जहका । जहका संवथ्सराय । संवथ्सराय लोपाँ । संवथ्सरायेतिं सं-वथ्सरायं । लोपा कपोतः । कपोत उलूकः । उलूक श्वशः । शशस्ते । ते नैर्ऋताः । नैर्ऋता कृकवाकुः । नैर्ऋता इतिं नैः-ऋताः । कृकवाकुस्सावित्रः । सावित्र इतिं सावित्रः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -19, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

रुरू॑ रौ॒द्रः । रौ॒द्रः कृ॑कलासः । कृ॒क॒ला॒स॒श्शु॒कुनिः॑ । शु॒कुनि॒ः पिप्प॑का । पिप्प॑का॒ ते । ते श॑र॒व्या॑ये । श॒र॒व्या॑ये हरि॒णः । ह॒रि॒णो मा॑रु॒तः । मा॒रु॒तो ब्रह्म॑णे । ब्रह्म॑णे शा॒र्गः । शा॒र्ग॒स्त॒रक्षुः॑ । त॒रक्षुः॑ कृ॒ष्णः । कृ॒ष्णः श्वा । श्वा च॑तुर॒क्षः । च॒तु॒र॒क्षोग॑र्द॒भः । च॒तु॒र॒क्ष इति॑ चतुः-अ॒क्षः । ग॒र्द॒भस्ते । त इ॑तरज॒नाना॑म् । इ॒त॒र॒ज॒नाना॑मग्नये॑ । इ॒त॒र॒ज॒नाना॒मिती॑तर-ज॒नाना॑म् । अ॒ग्नये॑ धू॒क्ष्णा॑म् । धू॒क्ष्णेति॑ धू॒क्ष्णा॑म् () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -20, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

अ॒ल॒ज आ॒॑न्तरि॒क्षः । आ॒न्त॒रि॒क्ष उ॒द्रः । उ॒द्रो म॒द्गुः । म॒द्गुः प्लु॒वः । प्लु॒वस्ते । ते॑ऽपाम् । अ॒पाम॑दि॑त्यै । अदि॑त्यै हग॑ंस॒सा॒चिः॑ । ह॒ꣳस॒सा॒चि॑रिन्द्रा॒ण्यै । ह॒ꣳस॒सा॒चि॒रिति॑ ह॒ꣳस-सा॒चिः॑ । इ॒न्द्रा॒ण्यै॒की॒शा॑म् । की॒शा॒ गृध्रः॑ । गृध्र॑श्चि॒ति॒क॒क्षी । शि॒ति॒क॒क्षी॒वा॒॑र्ध्रा॒ण॒सः । शि॒ति॒क॒क्षी॒ति॑ शिति-क॒क्षी । वा॒र्ध्रा॒ण॒स्ते । ते दि॒व्या । दि॒व्या द्या॑वापृथि॒व्या॑म् । द्या॒वा॒पृ॒थि॒व्या॒॑श्वा॒वित् । द्या॒वा॒पृ॒थि॒व्येति॑ द्यावा-पृ॒थि॒व्या॑म् । श्वा॒विदिति॑ श्व-वित् () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -21, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

सु॒प॒र्णः पा॒॑र्ज॒न्यः । सु॒प॒र्ण इति॑ सु-प॒र्णः । पा॒र्ज॒न्यो ह॒ꣳसः । ह॒ꣳसो वृक॑ः । वृको॑ वृषद॒ꣳशः । वृ॒ष॒द॒ꣳश॒स्ते । त ऐ॒न्द्राः । ऐ॒न्द्रा अ॒पा॑म् । अ॒पामु॒द्रः । उ॒द्रौ॑ऽर्य॒म्णे । अ॒र्य॒म्णे लो॑पा॒शः । लो॒पा॒श-स्सि॒ꣳहः । सि॒ꣳहो न॑कु॒लः । न॒कु॒लो व्या॒घ्रः । व्या॒घ्र॒स्ते । ते म॑हे॒न्द्राय॑ । म॒हे॒न्द्राय॒ कामा॑य । म॒हे॒न्द्रा॒येति॑ महा-इ॒न्द्राय॑ । कामा॑य पर॑स्वान् । पर॑स्वा॒निति॒ पर॑स्वान् () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -22, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

आग्नेयः कृष्णग्रीवः । कृष्णग्रीवस्सारस्वती । कृष्णग्रीव इति कृष्ण-ग्रीवः । सारस्वती मेषी । मेषी बभ्रुः । बभ्रुस्सौम्यः । सौम्यः पौष्णः । पौष्णश्श्यामः । श्यामश्शितिपृष्ठः । शितिपृष्ठो बार्हस्पत्यः । शितिपृष्ठ इति शिति-पृष्ठः । बार्हस्पत्य शित्पः । शित्पो वैश्वदेवः । वैश्वदेव ऐन्द्रः । वैश्वदेव इति वैश्व-देवः । ऐन्द्रोऽरुणः । अरुणो मारुतः । मारुतः कृत्माषः । कृत्माष ऐन्द्राग्नः । ऐन्द्राग्नस्संꣳहितः । ऐन्द्राग्न इत्यैन्द्र-अग्नः । सꣳहितोऽधोरामः । सꣳहित इति सं-हितः । अधोरामस्सावित्रः । अधोराम इत्यधः-रामः । सावित्रो वारुणः । वारुणः पेत्वः । पेत्व इति पेत्वः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -23, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

अश्वस्तूपरः । तूपरो गोमृगः । गोमृगस्ते । गोमृग इति गो-मृगः । ते प्राजापत्याः । प्राजापत्या आग्नेयौ । प्राजापत्या इति प्राजा-पत्याः । आग्नेयौ कृष्णग्रीवौ । कृष्णग्रीवौ ब्राष्ट्रौ । कृष्णग्रीवाविति कृष्ण-ग्रीवौ । ब्राष्ट्रौ लोमशसक्थौ । लोमशसक्थौ शितिपृष्ठौ । लोमशसक्थाविति लोमश-सक्थौ । शितिपृष्ठौ बार्हस्पत्यौ । शितिपृष्ठाविति शिति-पृष्ठौ । बार्हस्पत्यौ धात्रे । धात्रे पृषोदरः । पृषोदरस्सौर्यः । पृषोदर इति पृष-उदरः । सौर्यो बलक्षः । बलक्षः पेत्वः । पेत्व इति पेत्वः () ॥॥

काण्ड -5, प्रपाठक -5, अनुवाक -24, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेध-ब्राह्मणम्,

अग्नयेऽनीकवते । अनीकवते रोहितांजिः । अनीकवत इत्यनीक-वते । रोहितांजिरनड्वान् । रोहितांजिरिति रोहित-अंजिः । अनड्वानधोरामौ । अधोरामौ सावित्रौ । अधोरामावित्यधः-रामौ । सावित्रौ पौष्णौ । पौष्णौ रजतनाभी । रजतनाभी वैश्वदेवौ । रजतनाभी इति रजत-नाभी । वैश्वदेवौ पिशङ्गौ । वैश्वदेवाविति वैश्व-देवौ । पिशङ्गा तूपरौ ।

तूपरो मारुतः । मारुतः कल्माषः । कल्माष आग्नेयः । आग्नेयः कृष्णः । कृष्णोऽजः । अजस्सारस्वती । सारस्वती मेषी । मेषी वारुणः । वारुणः कृष्णः । कृष्ण एकशितिपात् । एकशितिपात्पेत्वः । एकशितिपादित्येक-शितिपात् । पेत्व इति पेत्वः () ॥॥

काण्ड -5, प्रपाठक -6, अनुवाक -1, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

हिरण्यवर्णाश्चुचयः । हिरण्यवर्णा इति हिरण्य-वर्णाः । शुचयः पावकाः । पावका यासु । यासु जातः । जातः कश्यपः । कश्यपो यासु । यास्विन्द्रः । इंद्र इतींद्रः ॥ अग्निं याः । या गर्भं । गर्भं दधिरे । दधिरे विरूपाः । विरूपास्ताः । विरूपा इति वि-रूपाः । ता नः । न आपः । आपः शम् । शꣳ स्योनाः । स्योना भवन्तु । भवन्त्विति भवन्तु ॥ यासाꣳ राजा । राजा वरुणः । वरुणो याति । याति मध्यै । मध्ये सत्यानृते । सत्यानृते अवपश्यन् । सत्यानृते इति सत्य-अनृते । अवपश्यञ्जनानाम् । अवपश्यन्नित्यव-पश्यन् । जनानामिति जनानां । मधुश्चुतश्चुचयः । मधुश्चुत इति मधु-श्चुतः । शुचयो याः । याः पावकाः । पावकास्ताः । ता नः । न आपः । आपश्शम् । शꣳ स्योनाः । स्योना भवन्तु । भवन्त्विति भवन्तु ॥ यासाँ देवाः । देवा दिवि । दिवि कृण्वन्ति । कृण्वन्ति भक्षम् । भक्षं याः । या अन्तरिक्षे । अन्तरिक्षे बहुधा । बहुधा भवन्ति । बहुधेति बहु-धा । भवन्तीति भवन्ति ॥ याः पृथिवीं । पृथिवीं पयसा । पयसोन्दन्ति । उन्दन्ति शुक्राः ()

काण्ड -5, प्रपाठक -6, अनुवाक -1, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

शुक्रास्ताः । ता नः । न आपः । आपः शम् । शꣳ स्योनाः । स्योना भवन्तु । भवन्त्विति भवन्तु ॥ शिवेन मा । मा चक्षुषा । चक्षुषा पश्यत । पश्यताऽपः । आपश्शिवयाँ । शिवया तनुवाँ । तनुवोप । उप स्पृशत । स्पृशत ब्रह्म । ब्रह्म

मे । म इति मे ॥ सर्वाꣳ अग्नीन् । अग्नीꣳरप्सुषदः । अप्सुषदो हुवे । अप्सुषद इतप्सु-सदः । हुवे वः । वो मयि । मयि वर्चः । वर्चो बलँ । बलमोजः । ओजो नि । नि धत्त । धत्तेति धत्त ॥ यददः । अदस्संप्रयतीः । संप्रयतीरहौ । संप्रयतीरिति सं-प्रयतीः । अहावनदत । अनदता हते । हत इति हते ॥ तस्मादा । आ नद्यः । नद्यो नामं । नामं स्थ । स्थ ता । ता वः । वो नामानि । नामानि सिन्धवः । सिन्धव इति सिन्धवः ॥ यत्प्रेषिताः । प्रेषिता वरुणेन । प्रेषिता इति प्र-इषिताः । वरुणेन ताः । ताश्चीभँ । शीभꣳ समवल्गत । समवल्गतेति सं-अवल्गत () ॥

काण्ड -5, प्रपाठक -6, अनुवाक -1, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

तदाप्नोत् । आप्नोदिंद्रः । इंद्रो वः । वो यतीः । यतीस्तस्मात् । तस्मादापः । आपो अनु । अनु स्थन । स्थनेति स्थन ॥ अपकामꣳ स्यन्दमानाः । अपकाममित्यप-कामम् । स्यन्दमाना अवीवरत । अवीवरत वः । वो हिकँ । हिकमिति हिकँम् ॥ इंद्रो वः । वज्रशक्तिभिः । शक्तिभिर्देवीः । शक्तिभिरिति शक्ति-भिः । देवीस्तस्मात् । तस्माद्वाः । वार्णामं । नामं वः । वो हितम् । हितमिति हितम् ॥ एको देवः । देवो अपि । अप्यतिष्ठत् । अतिष्ठथ्स्यन्दमानाः । स्यन्दमाना यथावशम् । यथावशमिति यथा-वशम् ॥ उदानिषुः । आनिषुर्महीः । महीरिति । इति तस्मात् । तस्मादुदकम् । उदकमुच्यते । उच्यत इत्युच्यते ॥ आपो भद्राः । भद्रा घृतम् । घृतमित् । इदापः । आप आसुः । आसुरग्नी- षोमौ । अग्नीषोमौ बिभ्रति । अग्नीषोमावित्यग्नी-सोमौ । बिभ्रत्यापः । आप इत् । इत्ताः । ता इति ताः ॥ तीव्रो रसः । रसो मधुपृचाम् । मधुपृचा-मरंगमः । मधुपृचामिति मधु-पृचाँ ()

काण्ड -5, प्रपाठक -6, अनुवाक -1, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। अरंगम आ । अरंगम इत्यरं-गमः । आ माँ । मा प्राणेनं । प्राणेनं सह् । प्राणेनेतिं प्र-अनेनं । सह् वर्चसा । वर्चसागन्न् । गन्नितिगन्न् ॥ आदित् । इत्पश्यामि । पश्याम्युत । उत वाँ । वा शृणोमि । शृणोम्या । आ माँ । मा घोषः । घोषो गच्छति । गच्छति वाक् । वाङ्नः । न आसाम् । आसामित्यासाम् ॥ मन्ये भेजानः । भेजानो अमृतस्य । अमृतस्य तर्हि । तर्हि हिरण्यवर्णाः । हिरण्यवर्णा अतृपं । हिरण्यवर्णा इति हिरण्य-वर्णाः । अतृपं यदा । यदा वः । व इतिं वः ॥ आपो हि । हिष्ठ । स्था मयोभुवः । मयोभुवस्ताः । मयोभुव इतिं मयः-भुवः । ता नः । न ऊर्जे । ऊर्जे दधातन । दधातनेतिं दधातन ॥ महेरणाय । रणाय चक्षसे । चक्षस इति चक्षसे ॥ यो वः । वश्शिवतमः । शिवतमो रसः । शिवतम इतिं शिव-तमः । रसस्तस्य । तस्य भाजयत । भाजयतेह । इह नः । न इति नः ॥ उशतीरिव । इव मातरः । मातर इतिं मातरः ॥ तस्मा अरँ । अरं गमाम । गमाम वः । वो यस्य । यस्य क्षयाय । क्षयाय जिन्वथ ॥ जिन्वथेति जिन्वथ ॥ आपो जनयथ । जनयथा चनः । न इतिं नः ॥ दिवि श्रयस्व । श्रयस्वान्तरिक्षे । अन्तरिक्षे यतस्व । यतस्व पृथिव्या । पृथिव्या सं । सं भव । भव ब्रह्मवर्चसं । ब्रह्मवर्चसमसि । ब्रह्मवर्चसमितिं ब्रह्म-वर्चसम् । असि ब्रह्मवर्चसाय । ब्रह्मवर्चसाय त्वा । ब्रह्मवर्चसायेतिं ब्रह्म-वर्चसाय । त्वेतिं त्वा () ॥॥

काण्ड -5, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

अपां ग्रहान् । ग्रहाँन्गृह्णाति । गृह्णात्येतत् । एतद्वाव । वाव राजसूयँ । राजसूयं यत् । राजसूयमितिं राज-सूयँ । यदेते । एते ग्रहाँः । ग्रहाँस्सवः । सवौँऽग्निः । अग्निर्वरुण सवः । वरुणसवो राजसूयँ । वरुणसव इतिं वरुण-सवः । राजसूयमग्निसवः । राजसूयमितिं राज-सूयँ । अग्निसवश्चित्यः । अग्निसव इत्यग्नि-सवः । चित्यस्ताभ्याँ । ताभ्यामेव । एव सूयते । सूयतेऽथौँ । अथो उभौ । अथो इत्यथौँ । उभावेव । एव लोकौ । लोकावभि । अभि जयति । जयति यः । यश्च । च राजसूयेन । राजसूयेनेजानस्य । राजसूयेनेतिं राज-सूयेन । ईजानस्य यः । यश्च । चाग्निचितः । अग्निचित आपः । अग्निचित इत्यग्नि-चितः । आपो भवन्ति । भवन्त्यापः । आपो वै । वा अग्नेः । अग्नेर्भार्तृव्याः ।

भ्रातृ॑व्या॒ यत् । यदपः । अपौ॑ऽग्नेः । अ॒ग्ने॒- र॒धस्ता॑त् । अ॒धस्ता॑दुप॒दधा॑ति । उ॒प॒दधा॑ति भ्रातृ॑व्याभिभूत्यै । उ॒प॒दधा॒तीत्यु॑प-दधा॑ति । भ्रातृ॑व्याभिभूत्यै भवति । भातृ॑व्याभिभूत्या इति॒ भ्रातृ॑व्य-अ॒भि॒भू॒त्यै॒ । भव॑त्या॒त्मना॑ । आ॒त्मना॒ परा॑ । परा॑स्य । अ॒स्य॒ भ्रातृ॑व्यः । भ्रातृ॑व्यो भवति । भ॒व॒त्य॒मृत॑म् । अमृ॑तं॒ वै ()

काण्ड -5, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। वा आपः॑ । आप॒स्तस्मा॑त् । तस्मा॑दद्भिः । अ॒द्भि-र॑व॒तान्त॑म् । अ॒द्भिरित्य॑त्-भिः । अव॑तान्त॒मभि । अव॑तान्त॒मित्यव॑-तान्तम् । अ॒भि-षि॑ञ्चन्ति । सिञ्च॑ति न । नार्ति॑म् । आर्ति॒मा । आर्छ॑ति । ऋ॒च्छ॒ति॒ सर्व॑म् । सर्व॒- मायु॑ः । आयु॑रेति । ए॒ति॒ यस्य॑ । यस्ये॒ताः । ए॒ता उ॑पधी॒यन्त॑ । उ॒प॒धी॒यन्ते॒ यः । उ॒प॒धी॒यन्त॒ इत्यु॑प-धी॒यन्त॑ । य उ॑ । उ॒ च॒ । चै॒नाः॒ । ए॒ना ए॒वं । ए॒वं वेद॑ । वेदान्न॑म् । अन्नं॒ वै । वा आपः॑ । आपः॑ प॒शव॑ः । प॒शव॒ आपः॑ । आपोऽन्न॑म् । आन्नं॑ प॒शव॑ः । प॒शवो॑ऽन्नादः । अ॒न्नादः॑ प॑शु॒मान् । अ॒न्नाद इत्य॑न्न-अ॒दः॒ । प॒शु॒मान्भ॑वति । प॒शु॒मानिति॑ पशु-मान् । भ॒व॒ति॒ यस्य॑ । यस्ये॒ ताः । ए॒ता उ॑पधी॒यन्त॑ । उ॒प॒धी॒यन्ते॒ यः । उ॒प॒धी॒यन्त॒ इत्यु॑प-धी॒यन्त॑ । य उ॑ । उ॒ च॒ । चै॒नाः॒ । ए॒ना ए॒वं । ए॒नं वेद॑ । वेद॒ द्वाद॑श । द्वाद॑श भवन्ति । भ॒व॒न्ति॒ द्वाद॑श । द्वाद॑श॒ मासा॑ः । मासा॑स्संवथ्स॒रः । स॒ंव॒थ्स॒रस्स॑ंवथ्स॒रेण॑ । स॒ंव॒थ्स॒र इति॑ सं-व॒थ्स॒रः । स॒ंव॒थ्स॒रेणे॑व । स॒ंव॒थ्स॒रेणे॑ति सं-व॒थ्स॒रेण॑ । ए॒वास्मै॑ । अ॒स्मा अन्न॑म् ()

काण्ड -5, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। अन्न॑मव॑ । अव॑ रुन्धे । रु॒न्धे॒ पात्रा॑णि । पात्रा॑णि भवन्ति । भ॒व॒न्ति॒ पात्र॑म् । पात्रे॒ वै । वा अन्न॑म् । अन्न॑मद्यते । अ॒द्य॒ते॒ सयो॑नि । सयौ॑न्येव । सयो॒नीति॒ स-यो॒नि॒ । ए॒वान्न॑म् । अन्न॑मव॑ । अव॑ रुन्धे । रु॒न्ध॒ आ । आ द्वा॑दशात् । द्वा॒द॒शात्पुरु॑षात् । पुरु॑षा॒दन्न॑म् । अन्न॑मत्ति । अ॒त्त्यथौ॑ । अथो॒ पात्रा॑त् । अथो॒ इत्यथौ॑ । पात्रा॒न्न । न छि॑द्यते । छि॒द्य॒ते॒

यस्य॑ । यस्येताः । एता उ॑पधी॒यन्ते॑ । उ॒प॒धी॒यन्ते॒ यः । उ॒प॒धी॒यन्त॒ इत्यु॑प-धि॒यन्ते॑ । य उ॑ । उ॒ च॒ । चै॒नाः॒ । ए॒ना॒ एवं॑ । एव॑ वेद॑ । वेद॑ कु॒भाः॒ । कु॒भाश्च॑ । च॒ कु॒भीः॒ । कु॒भीश्च॑ । च॒ मि॒थु॒नानि॑ । मि॒थु॒नानि॑ भवन्ति । भ॒व॒न्ति॒ मि॒थु॒नस्य॑ । मि॒थु॒नस्य॑ प्र॒जात्यै॑ । प्र॒जात्यै॒ प्र । प्र॒जात्या॒ इति॒ प्र-जा॒त्यै॒ । प्र प॒शव॑या॒ । प्र॒जया॑ प॒शुभिः॑ । प्र॒जये॑ति॒ प्र-ज॒या॒ । प॒शुभि॑र्मिथु॒नैः॒ । प॒शुभि॒रिति॑ प॒शु-भिः॒ । मि॒थु॒नैर्जा॑यते । जा॒य॒ते॒ यस्य॑ । यस्येताः । एता उ॑पधी॒यन्ते॑ । उ॒प॒धी॒यन्ते॒ यः । उ॒प॒धी॒यन्त॒ इत्यु॑प-धी॒यन्ते॑ । य उ॑ । उ॒ च॒ ()

काण्ड -5, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। चै॒नाः॒ । ए॒ना॒ एवं॑ । एव॑ वेद॑ । वेद॒ शुक् । शुग्वै । वा अ॒ग्निः । अ॒ग्निस्सः । सोऽ॑ध्व॒र्युम् । अ॒ध्व॒र्युं य॑जमानम् । य॒ज॒मान॑ं प्र॒जाः । प्र॒जाश्शुचा । प्र॒जा इति॑ प्र-जाः । शुचाऽर्पयति । अ॒र्प॒य॒ति॒ यत् । यदपः । अ॒प उ॑प॒द॒धा॑ति । उ॒प॒द॒धा॑ति शुचँ॑ । उ॒प॒द॒धा॒तीत्यु॑प-दधा॑ति । शुच॑मेव । ए॒वास्य॑ । अ॒स्य॒ शम॑यति । शम॑यति न । नार्ति॑ं । आर्ति॑मा । आर्छ॑ति । ऋ॒च्छ॒त्य॒ध्व॒र्युः । अ॒ध्व॒र्युर्न । न य॑जमानः । य॒ज॒मा॒न॒श्शाम्य॑न्ति । शाम्य॑न्ति प्र॒जाः । प्र॒जा यत्र॑ । प्र॒जा इति॑ प्र-जाः । यत्रे॒ताः । एता उ॑पधी॒यन्ते॑ । उ॒प॒धी॒यन्तेऽपां । उ॒प॒धी॒यन्त॒ इत्यु॑प-धी॒यन्ते॑ । अ॒पां वै । वा ए॒तानि॑ । ए॒तानि॑ हृ॒द॒यानि । हृ॒द॒यानि॒ यत् । यदे॒ताः । एता आपः॑ । आपो॒ यत् । य दे॒ताः । एता अ॒पः । अ॒प उ॑प॒द॒धा॑ति । उ॒प॒द॒धा॑ति दि॒व्याभिः॑ । उ॒प॒द॒धा॒तीत्यु॑प-दधा॑ति । दि॒व्याभि॑रेव । ए॒वैनाः॒ । ए॒नास्सं॑ । सꣳ सृ॑जति । सृ॒ज॒ति॒ वर्षु॑कः । वर्षु॑कः प॒र्ज॒न्यः॑ । प॒र्ज॒न्यो॑ भवति ()

काण्ड -5, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -5,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। भवति यः । यो वै । वा एतासाँ । एतासामायतनं । आयतनं क्लिप्तम् । आयतनमित्याँ-यतनं । क्लिप्तं वेदं । वेदायतनवान् । आयतनवान्भवति । आयतनवानित्यायतन-वान् । भवति कल्पते । कल्पतेऽस्मै । अस्मा अनुसीतम् । अनुसीत मुपं । अनुसीतमित्यनु-सीतम् । उपं दधाति । दधात्येतत् । एतद्वै । वा आसाम् । आसामायतनं । आयतनमेषा । आयतनमित्याँ-यतनम् । एषाक्लिप्तः । क्लिप्तर्यः । य एवं । एवं वेदं । वेदायतनवान् । आयतनवान्भवति । आयतनवानित्यायतन-वान् । भवति कल्पते । कल्पतेऽस्मै । अस्मै द्वन्द्वं । द्वन्द्वमन्याः । द्वन्द्वमितिं द्वं-द्वम् । अन्या उपं । उपं दधाति । दधाति चतस्रः । चतस्रो मध्यैँ । मध्ये धृत्यैँ । धृत्या अन्नँ । अन्नं वै । वा इष्टंकाः । इष्टंका एतत् । एतत्खलुं । खलु वै । वै साक्षात् । साक्षादन्नँ । साक्षादितिं स-अक्षात् । अन्नं यत् । यदेषः । एष चरुः । चरुर्यत् । यदेतं । एतं चरुं । चरुमुंप दधाति । उपदधाति साक्षात् । उपदधातीत्युंप-दधाति । साक्षादेव । साक्षादितिं स-अक्षात् ()

काण्ड -5, प्रपाठक -6, अनुवाक -2, अनुवाक सूक्तम -6,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। एवास्मैँ । अस्मा अन्नँ । अन्नमवं । अवं रुन्धे । रुन्धे मध्यतः । मध्यत उपं । उपं दधाति । दधाति मध्यतः । मध्यत एव । एवास्मैँ । अस्मा अन्नँ । अन्नं दधाति । दधाति तस्माँत् । तस्माँन्मध्यतः । मध्यतोऽन्नँ । अन्नमद्यते । अद्यते बार्हस्पत्यः । बार्हस्पत्यो भंवति । भवति ब्रह्मं । ब्रह्म वै । वै देवानाँ । देवानां बृहस्पतिः । बृहस्पतिर्ब्रह्मंणा । ब्रह्मंणैव । एवास्मैँ । अस्मा अन्नँ । अन्नमवं । अवं रुन्धे । रुन्धे ब्रह्मवर्चसं । ब्रह्मवर्चसमंसि । ब्रह्मवर्चसमितिं ब्रह्म-वर्चसं । असि ब्रह्मवर्चसायं । ब्रह्मवर्चसायं ब्वा । ब्रह्मवर्चसायेतिं ब्रह्म-वर्चसायं । ब्वेतिं । इत्याह । आह तेजस्वी । तेजस्वी ब्रंह्मवर्चसी । ब्रह्मवर्चसी भंवति । ब्रह्मवर्चसीतिं ब्रह्म-वर्चसी । भवति यस्यं । यस्येषः । एष उंपधीयतैँ । उपधीयते यः । उपधीयत इत्युंप-धीयतैँ । य उं । उ च । चै नं । एनमेवं । एवं वेदं । वेदेति वेदं () ॥॥

काण्ड -5, प्रपाठक -6, अनुवाक -3, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

भूतेष्टका उप॑ । भूतेष्टका इति॑ भूत-इ॒ष्ट॒काः । उप॑ दधाति । द॒धा-त्यत्रा॑त्र । अता॑ऽत्र वै । अत्रात्रेत्यत्र॑-अ॒त्र । वै मृ॒त्युः । मृ॒त्युर्जा॑यते । जा॒य॒ते यत्र॑ यत्र । यत्र॑ यत्रैव । यत्र॑ य॒त्रेति॒ यत्र॑-य॒त्र । एव मृ॒त्युः । मृ॒त्युर्जा॑यते । जाय॑ते ततः । तत॑ एव । एवैन॑म् । ए॒न॒मव॑ । अव॑ यजते । य॒ज॒ते तस्मा॑त् । तस्मा॑दग्निचित् । अ॒ग्नि॒चिथ्सर्वं॑ । अ॒ग्नि॒चिदित्य॑ग्नि-चित् । सर्व॒मायुः॑ । आयु॒रेति॑ । ए॒ति॒ सर्वं॑ । सर्वे॒ हि । ह्य॑स्य । अ॒स्य॒ मृ॒त्यवः॑ । मृ॒त्यवोऽवै॑ष्टाः । अवै॑ष्टास्तस्मा॑त् । अवै॑ष्टा इत्यव॑-इ॒ष्टाः॒ । तस्मा॑दग्निचित् । अ॒ग्नि॒चिन्न । अ॒ग्नि॒चिदित्य॑ग्नि-चित् । नाभिच॑रित॒ वै । अ॒भिच॑रित॒ वै प्र॒त्यक् । अ॒बि॒च॑रित॒ वा इत्य॒भि-च॒रि॒त॒ वै । प्र॒त्यगे॑नं । ए॒न॒मभि॒चारः॑ । अ॒बि॒चार॑स्तृणुते । अ॒बि॒चार इत्य॑भि-चारः । स्तृ॒णु॒ते सू॒यते॑ । सू॒यते॒ वै । वा एषः । ए॒ष यः । यो॑ऽग्निं । अ॒ग्निं चि॑नुते । चि॒नु॒ते दे॑वसु॒वाम् । दे॒व॒सु॒वामे॒तानि॑ । दे॒व॒सु॒वावि॑ति॑ देव-सु॒वा॑ । ए॒तानि॑ ह॒वीꣳषि॑ । ह॒वीꣳषि॑ भवन्ति । भ॒व॒न्त्ये॒तावे॑न्तः । ए॒तावे॑न्तो॒ वै । वै दे॒वाना॑म् । दे॒वाना॑ꣳ स॒वाः । स॒वास्ते । त एव । ए॒वास्मै॑ ()

काण्ड -5, प्रपाठक -6, अनुवाक -3, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। अ॒स्मै॒ स॒वान् । स॒वान्र । प्रय॑च्छन्ति । य॒च्छ॒न्ति॒ ते । त ए॑नं । ए॒न॒ꣳ सु॒व॒न्ते॒ । सु॒व॒न्ते॒ स॒वः । स॒वोऽग्निः । अ॒ग्निर्व॑रुणस॒वः । व॒रु॒ण॒स॒वो रा॑ज॒सूय॑म् । व॒रु॒ण॒स॒व इति॑ वरुण-स॒वः । रा॒ज॒सूय॑ ब्रह्मस॒वः । रा॒ज॒सूय॒मिति॑ राज-सूय॑म् । ब्र॒ह्म॒स॒व॒श्चित्यः॑ । ब्र॒ह्म॒स॒व इति॑ ब्रह्म-स॒वः । चित्यो॑ दे॒वस्य॑ । दे॒वस्य॑ त्वा । त्वा स॒वि॒तुः । स॒वि॒तुः प्र॑स॒वे । प॒स॒व इति॑ । प॒स॒व इति॑ प्र-स॒वः । इत्या॑ह । आ॒ह॒ स॒वि॒तृप्र॑सूतः । स॒वि॒तृप्र॑सूत एव । स॒वि॒तृप्र॑सूत इति॑ सवितृ- प॒सू॒तः । ए॒वैन॑म् । ए॒न॒ं ब्रह्म॑णा । ब्रह्म॑णा दे॒वता॑भिः । दे॒वता॑भिरभि । अ॒भि॒षि॑ंचति । सि॒ंच॒त्य॒न्न॑- स्यान्नस्य । अन्न॑स्यान्नस्याभि । अन्य॑स्यान्न॒स्येत्यन्न॑स्य-अ॒न्न॒स्य॒ । अ॒भि॒षि॑ंचति । सि॒ंच॒त्य॒न्न॑-स्यान्नस्य । अन्न॑स्यान्नस्यावरुद्ध्यै । अन्न॑स्यान्न॒स्येत्यन्न॑स्य-अ॒न्न॒स्य॒ । अव॑रुद्ध्यै पुर-स्ता॑त् । अव॑रुद्धा इत्यव॑-रु॒द्ध्यै॒ । पु॒र॒स्ता॑त्प्र॒त्यं॑च॑म् । प्र॒त्यं॑च॒मभि॑ । अ॒भि॒षि॑ंचति । सि॒ंच॒ति॒ पु॒र॒स्ता॑त् ।

पुरस्ताद्धि । हि प्रतीचीनँ । प्रतीचीनमन्नँ । अन्नमद्यतैँ । अद्यते शीर्षतः । शीर्षतोऽभि । अभिषिंचति । सिंचति शीर्षतः । शीर्षतो हि । ह्यन्नँ । अन्नमद्यतैँ । अद्यत आ । आ मुखात्‌ । मुखादन्ववस्रावयति । अन्ववस्रावयति मुखतः । अन्ववस्रावयतीत्यनु-अवस्रावयति ()

काण्ड -5, प्रपाठक -6, अनुवाक -3, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। मुखत एव । एवास्मैँ । अस्मा अन्नादँ । अन्नादं दधाति । अन्नादमित्यन्न-अदँ । दधात्यग्नेः । अग्नेस्त्वाँ । त्वा साम्राँज्येन । साम्राँज्येनाभि । साम्राँज्येनेति सां-राज्येन । अभिषिंचामि । सिंचामीतिं । इत्याह । आहैषः । एष वै । वा अग्नेः । अग्नेस्सवः । सवस्तेनं । तेनैव । एवैनँ । एनमभि । अभिषिंचति । सिंचति बृहस्पतेँः । बृहस्पतैस्त्वा । त्वा साम्राँज्येन । साम्राँज्येनाभि । साम्राँज्येनेति सां-राज्येन । अभिषिंचामि । सिंचामीतिं । इत्याह । आह ब्रह्मं । ब्रह्म वै । वै देवानाँ । देवानां बृहस्पतिः । बृहस्पतिर्ब्रह्मणा । ब्रह्मणैव । एवैनँ । एनमभि । अभिषिंचति । सिंचतीन्द्रस्य । इन्द्रस्य त्वा । त्वा साम्राँज्येन । साम्राँज्येनाभि । साम्राँज्येनेति सां-राज्येन । अभिषिंचामि । सिंचामीतिं । इत्याह । आहेन्द्रि- यम्‌ । इंद्रियमेव । एवास्मिन्‌ । अस्मिन्नुपरिष्टात्‌ । उपरिष्टाद्दधाति । दधात्येतत्‌ । एतद्वै ()

काण्ड -5, प्रपाठक -6, अनुवाक -3, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। वै राजसूयस्य । राजसूयस्य रूपं । राजसूयस्येतिं राज-सूयस्य । रूपं यः । य एवम्‌ । एवं विद्वान्‌ । विद्वानग्निं । अग्निं चिनुते । चिनुत उभौ । उभावेव । एवलोकौ । लोकावभि । अभि जयति । जयति यः । यश्च । च राजसूयेन । राजसूयेनेजानस्यं । राजसूयेनेतिं राज-सूयेन । ईजानस्य यः । यश्च । चाग्निचितः । अग्निचित इंद्रस्य । अग्निचित इत्यग्नि-चितः । इंद्रस्य सुषुवाणस्यं । सुषुवाणस्यं दशधा । दशधेंद्रियं । दशधेतिं दश-धा । इंद्रियं वीर्यैम्‌ । वीर्यं परां ।

परा॑ऽपतत् । अ॒प॒त॒त्त॒त् । तद्दे॒वाः । दे॒वाः॒सौ॒त्रा॒म॒ण्या । सौ॒त्रा॒म॒ण्या सं । सम॑भरन्न् । अ॒भ॒र॒न्थ्सू॒यते॑ । सू॒यते॒ वै । वा एषः । एष॒यः । यौ॑ऽअ॒ग्निं । अ॒ग्निं चि॑नु॒ते । चि॒नु॒तेॅ॑ऽअ॒ग्निं । अ॒ग्निं चि॒त्वा । चि॒त्वा सौ॒त्रा॒म॒ण्या । सौ॒त्रा॒म॒ण्या य॑जेत । य॒जे॒तेंद्रि॒यं । इ॒न्द्रि॒यमेव । एव वी॒र्यं॑ । वी॒र्य॑ꣳ सं॒भृत्य॑ । सं॒भृ॒त्या॒त्मन् । सं॒भृत्येति॑ सं-भृत्य॑ । आ॒त्मन्ध॑त्ते । ध॒त्त॒ इति॑ धत्ते () ॥॥

काण्ड -5, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

स॒जू॒रब्द॑ः । स॒जू॒रिति॑ स-जूः । अब्दो॑ऽया॑वभिः । अया॑व॒भि॒स्स॒जू॒ः । अया॑-वभि॒रित्यया॑व-भि॒ः । स॒जू॒रुषाः । स॒जू॒रिति॑ स-जूः । उ॒षा अरु॑णीभिः । अरु॑णीभिः स॒जू॒ः । स॒जू॒स्सूर्य॑ । स॒जू॒रिति॑ स-जूः । सूर्य॑ एत॑शेन । एत॑शेन स॒जो॒षौ॑ । स॒जो॒षा॑व॒श्वि॒ना॑ । स॒जो॒षा॒विति॑ स-जो॒षौ॑ । अ॒श्वि॒ना॒ द॒ꣳसो॑भिः । द॒ꣳसो॑भि-स्स॒जू॒ः । द॒ꣳसो॑भि॒रिति॑द॒ꣳस॑ः-भि॒ः । स॒जू॒रग्निः । स॒जू॒रिति॑ स-जूः । अ॒ग्निर्वै॑श्वा-न॒रः । वै॒श्वा॒न॒र इडा॑भिः । इडा॑भि॒र्घृ॒तेन॑ । घृ॒तेन॒ स्वाहा॑ । स्वाहा॑ संवथ्स॒रः । सं॒व॒थ्स॒रो वै । सं॒व॒थ्स॒र इति॑ सं-व॒थ्स॒रः । वा अब्द॑ः । अब्दो॒ मासा॑ः । मासा॒ अया॑वाः । अया॑वा उ॒षाः । उ॒षा अरु॑णी । अरु॑णी॒ सूर्य॑ः । सूर्य॒ एत॑शः । एत॑श॒ इ॒मे । इ॒मे अ॒श्वि॒ना॑ । इ॒मे इ॒ती॒मे । अ॒श्वि॒ना॑ संवथ्स॒रः । सं॒व॒थ्स॒रोॅ॑ऽग्निः । सं॒व॒थ्स॒र इति॑ सं-व॒थ्स॒रः । अ॒ग्निर्वै॑श्वान॒रः । वै॒श्वा॒न॒रः प॒शव॑ः । प॒शव॒ इडा॑ । इडा॑ प॒शव॑ः । प॒शवो॑ घृ॒तम् । घृ॒तꣳ सं॑वथ्स॒रं । सं॒व॒थ्स॒रं प॒शव॑ः । सं॒व॒थ्स॒रमिति॑ सं-व॒थ्स॒रम् । प॒शवो॑ऽनु॑ । अनु॒ प्र । प्र जा॑यन्ते । जा॒य॒न्ते॒ सं॒व॒थ्स॒रेण॑ । सं॒व॒थ्स॒रेणै॒व । सं॒व॒थ्स॒रेणेति॑ सं-व॒त्स॒रेण॑ । एवास्मै॑ । अ॒स्मै॒ प॒शून् । प॒शून्प्र । प्र ज॑नयति । ज॒न॒य॒ति॒ दर्भ॑स्तंबे । दर्भ॑स्तंबे जु॑होति । दर्भ॑स्तंब॒ इति॑ दर्भ-स्तंबे । जु॒हो॒ति॒ यत् । यद्वै ()

काण्ड -5, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। वा अस्याः । अस्या अमृतँ । अमृतं यत् । यद्वीर्यँ । वीर्यं तत् । तद्दर्भाः । दर्भास्तस्मिन्न् । तस्मिंज्जुहोति । जुहोति प्र । प्रैव । एव जायते । जायतेऽन्नादः । अन्नादो भवति । अन्नाद इत्यन्न-अदः । भवति यस्य । यस्यैवं । एवं जुह्वति । जुह्वत्येताः । एता वै । वै देवताँः । देवता अग्नेः । अग्नेः पुरस्ताँद्भागाः । पुरस्ताँद्भागास्ताः । पुरस्ताँद्भागा इति पुरस्ताँत्-भागाः । ता एव । एव प्रीणाति । प्रीणात्यथौ । अथो चक्षुः । अथो इत्यथौ । चक्षुरेव । एवाग्नेः । अग्नेः पुरस्ताँत् । पुरस्तात्प्रति । प्रति दधाति । दधात्यनन्धः । अनन्धो भवति । भवति यः । य एवं । एवं वेद । वेदाऽपः । आपो वै । वा इदं । इदमग्रै । अग्रे सलिलं । सलिलमासीत् । आसीथ्सः । स प्रजापतिः । प्रजापतिः पुष्करपर्णे । प्रजापतिरिति प्रजा-पतिः । पुष्करपर्णे वातः । पुष्करपर्ण इति पुष्कर-पर्णे । वातो भूतः । भूतोऽलेलायत् । अलेलायथ्सः । स प्रतिष्ठां ()

काण्ड -5, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। प्रतिष्ठां न । प्रतिष्ठामिति प्रति-स्थाम् । नाविन्दत । अविन्दत सः । स एतत् । एतदपां । अपां कुलायँ । कुलायमपश्यत् । अपश्यत्तस्मिन्न् । तस्मिन्नग्निं । अग्निमचिनुत । अचिनुत तत् । तदियं । इयमभवत् । अभवत्ततः । ततो वै । वै सः । स प्रति । प्रत्य-तिष्ठत् । अतिष्ठद्यां । यां पुरस्ताँत् । पुरस्तादुपादधात् । उपादधात्तत् । उपादधादित्युप-अदधात् । तच्छिरः । शिरोऽभवत् । अभवथ्सा । सा प्राचीँ । प्राची दिक् । दिग्यां । यां दक्षिणतः । दक्षिणत उपादधात् । उपादधाथ्सः । उपादधादित्युप-अदधात् । स दक्षिणः । दक्षिणः पक्षः । पक्षोऽभवत् । अभवथ्सा । सा दक्षिणा । दक्षिणा दिक् । दिग्यां । यां पश्चात् । पश्चादुपा- दधात् । उपादधात्तत् । उपादधादित्युप-अदधात् । तत्पुच्छँ । पुच्छमभवत् । अभवथ्सा । सा प्रतीचीँ । प्रतिची दिक् । दिग्यां । यामुत्तरतः । उत्तरत उपा-दधात् । उत्तरत इत्युत्-तरतः । उपादधाथ्सः । उपादधादित्युप-अदधात् ()

काण्ड -5, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -4,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। स उत्तरः । उत्तरः पक्षः । उत्तर इत्युत्-तरः । पक्षोऽभवत् । अभवथ्सा । सोदीची । उदीची दिक् । दिग्यां । यामुपरिष्टात् । उपरिष्टादुपा-दधात् । उपादधात्तत् । उपादधादित्युप-अदधात् । तत्पृष्ठं । पृष्ठ- मभवत् । अभवथ्सा । सोर्ध्वा । ऊर्ध्वा दिक् । दिगियं । इयं वै । वा अग्निः । अग्निः पंचैष्टकः । पंचैष्टकस्तस्मात् । पंचैष्टक इति पंच-इष्टकः । तस्माद्यत् । यदस्यां । अस्यां खनन्ति । खनन्त्यभि । अभीष्टकां । इष्टकां तृन्दन्ति । तृन्दन्त्यभि । अभि शर्करां । शर्कराꣳ सर्वा । सर्वा वै । वा इयं । इयं वयोभ्यः । वयोभ्यो नक्तं । वयोभ्य इति वयः-भ्यः । नक्तं दृशे । दृशे दीप्यते । दीप्यते तस्मात् । तस्मादिमां । इमां वयाꣳसि । वयाꣳसि नक्तं । नक्तं न । नार्धि । अध्यासते । आसते यः । य एवं । एवं विद्वान् । विद्वानग्निं । अग्निं चिनुते । चिनुते प्रति । प्रत्येव । एव तिष्ठति ()

काण्ड -5, प्रपाठक -6, अनुवाक -4, अनुवाक सूक्तम -5,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। तिष्ठत्यभि । अभिदिशः । दिशो जयति । जयत्याग्नेयः । आग्नेयो वै । वै ब्राह्मणः । ब्राह्मणस्तस्मात् । तस्माद्ब्राह्मणाय । ब्राह्मणाय सर्वासु । सर्वासु दिक्षु । दिक्ष्वर्धुकम् । अर्धुकꣳ स्वां । स्वामेव । एव तत् । तद्दिशं । दिशमनु । अन्वेति । एत्यपां । अपां वै । वा अग्निः । अग्निः कुलायं । कुलायं तस्मात् । तस्मादापः । आपोऽग्निं । अग्निꣳ हारुकाः । हारुकास्स्वाम् । स्वामेव । एव तत् । तद्योनिं । योनिं प्र । प्र विशन्ति । विशन्तीति विशन्ति () ॥॥

काण्ड -5, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

संवथ्सरमुख्यं । संवथ्सरमिति सं-वथ्सरम् । उख्यं भृत्वा । भृत्वा द्वितीयं । द्वितीये संवथ्सरे । संवथ्सर आग्नेयं । संवथ्सर इति सं-वथ्सरे । आग्नेयमष्टाकपालं । अष्टाकपालं निः । अष्टाकपालमित्यष्टा-कपालं । निर्वपेत् । वपेदैन्द्रं ।

ऐंद्रमेकादशकपालं । एकादशकपालं वैश्वदेवं । एकादशकपालमित्येकादश-कपालं । वैश्वदेवं द्वादशकपालं । वैश्वदेवमिति वैश्व-देवम् । द्वादशकपालं बार्हस्पत्यम् । द्वादशकपालमिति द्वादश- कपालं । बार्हस्पत्यम् चरुं । चरुं वैष्णवं । वैष्णवं त्रिकपालं । त्रिकपालं तृतीयै । त्रिकपालमिति त्रि-कपालं । तृतीये संवथ्सरे । संवथ्सरेऽभिजिता । संवथ्सर इति सं-वथ्सरे । अभिजिता यजेत । अभिजितेत्यभि-जिता । यजेत यत् । यदष्टाकपालः । अष्टाकपालो भवति । अष्टाकपाल इत्यष्टा-कपालः । भवत्यष्टाक्षरा । अष्टाक्षरा गायत्री । अष्टाक्षरेत्यष्टा-अक्षरा । गाय-त्र्याग्नेयं । आग्नेयं गायत्रं । गायत्रं प्रातस्सवनं । प्रातस्सवनं प्रात-स्सवनं । प्रातसवनमेव । प्रातस्सवनमिति प्रातः-सवनं । एव तेन । तेन दाधार । दाधार गायत्रीं । गायत्रीं छन्दः । छन्दो यत् । यदेकादश- कपालः । एकादशकपालो भवति । एकादशकपाल इत्येकादश-कपालः । भवत्येका-दशाक्षरा । एकादशाक्षरा त्रिष्टुक् । एकादशाक्षरेत्येकादश-अक्षरा । त्रिष्टुगैंद्र । ऐन्दं त्रैष्टुभम् । त्रैष्टुभं माध्यंदिनं । माध्यंदिनꣳ सवनं । सवनं माध्यंदिनं । माध्यंदिनमेव । एव सवनं । सवनं तेन । तेन दाधार । दाधार त्रिष्टुभ । त्रिष्टुभं छन्दः ()

काण्ड -5, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। छन्दो यत् । यद्वादशकपालः । द्वादशकपालो भवति । द्वादशकपाल इति द्वादश-कपालः । भवति द्वादशाक्षरा । द्वादशाक्षरा जगती । द्वादशाक्षरेति द्वादश-अक्षरा । जगती वैश्वदेवं । वैश्वदेवं जागतं । वैश्वदेवमिति वैश्व-देवं । जागतं तृतीयसवनं । तृतीयसवनं तृतीय-सवनं । तृतीयसवनमिति तृतीय-सवनं । तृतीयसवनमेव । तृतीय-सवनमिति तृतीय-सवनं । एव तेन । तेन दाधार । दाधार जगतीम् । जगतीं छन्दः । छन्दो यत् । यद्बार्हस्पत्यः । बार्हस्पत्यश्चरुः । चरुर्भवति । भवति ब्रह्म । ब्रह्म वै । वै देवानाम् । देवानां बृहस्पतिः । बृहस्पतिर्ब्रह्म । ब्रह्मैव । एव तेन । तेन दाधार । दाधार यत् । यद्वैष्णवः । वैष्णवस्त्रि-कपालः । त्रिकपालो भवति । त्रिकपाल इति त्रि-कपालः । भवति यज्ञः । यज्ञो वै । वै विष्णुः । विष्णुर्यज्ञं । यज्ञमेव । एव तेन । तेन दाधार । दाधार यत् । यत्तृतीयै । तृतीये संवथ्सरे ।

संवथ्सरेऽभिजिताँ । संवथ्सर इति सं-वथ्सरे । अभिजिता यजते । अभिजितेत्यभि-जिताँ । यजतेऽभिजित्यै । अभिजित्यै यत् । अभिजित्या इत्यभि-जित्यै । यथ्संवथ्सरं । संवथ्सर मुख्यँ । संवथ्सरमिति सं-वथ्सरं । उख्यं बिभर्ति । बिभर्तीमम् । इममेव । एव तेन ()

काण्ड -5, प्रपाठक -6, अनुवाक -5, अनुवाक सूक्तम -3,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

। तेन लोकम् । लोकꣳ स्पृणोति । स्पृणोति यत् । यद्वितीयै । द्वितीये संवथ्सरे । संवथ्सरेऽग्निं । संवथ्सर इति सं-वथ्सरे । अग्निं चिनुते । चिनुतेऽन्तरिक्षं । अन्तरिक्षमेव । एव तेन । तेन स्पृणोति । स्पृणोति यत् । यत्तृतीयै । तृतीये संवथ्सरे । संवथ्सरे यजते । संवथ्सर इति सं- वथ्सरे । यजतेऽमुम् । अमुमेव । एव तेन । तेन लोकम् । लोकꣳ स्पृणोति । स्पृणोत्येतं । एतं वै । वै परः । परं आद्गारः । आद्गारः कक्षी-वान् । कक्षीवाꣳ औशिजः । कक्षीवानिति कक्षी-वान् । औशिजो वीतहव्यः । वीतहव्यश्श्रायसः । वीतहव्य इति वीत-हव्यः । श्रायसस्त्रसदस्युः । त्रसदस्युः पौरुकुत्स्यः । पौरुकुत्स्यः प्रजाकामाः । पौरुकुत्स्य इति पौरु-कुत्स्यः । प्रजाकामा अचिन्वत । प्रजाकामा इति प्रजा-कामाः । अचिन्वत ततः । ततो वै । वै ते । ते सहस्रꣳसहस्रं । सहसꣳसहस्रं पुत्रान् । सहस्रꣳसहस्रमिति सहस्र-सहस्रं । पुत्रानविन्दन्त । अविन्दत प्रथते । प्रथते प्रजयाँ । प्रजया पशुभिः । प्रजयेति प्र-जयाँ । पशुभिस्तां । पशुभिरिति पशु-भिः । तां मात्राँ । मात्रामाप्नोति । आप्नोति याम् । यां ते । तेऽगच्छन्न् । अगच्छन्, यः । य एवं । एवं विद्वान् । विद्वानेतं । एतमग्निं । अग्निं चिनुते । चिनुत इति चिनुते () ॥॥

काण्ड -5, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -1,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

प्रजापतिरग्निं । प्रजापतिरितिं प्रजा-पतिः । अग्निमचिनुत । अचिनुत सः । सक्षुरपविः । क्षुरपविर्भूत्वा । क्षुरपविरितिं क्षुर-पविः । भूत्वाऽतिंष्ठत् । अतिष्ठत्तं । तं देवाः । देवा बिभ्यतः । बिभ्यतो न । नोपं । उपायन्न् । आयन्ते । ते छन्दोंभिः । छनोंभिरात्मानँ । छन्दोंभिरिति छन्दः-भिः । आत्मानं छादयित्वा । छादयित्वोपं । उपायन्न् । आयन्तत् । तच्छन्दसां । छन्दसां छन्दस्त्वं । छन्दस्त्वं ब्रह्मं । छन्दस्त्वमितिं छन्दः-त्वम् । ब्रह्म वै । वै छन्दाँसि । छन्दाँसि ब्रह्मणः । ब्रह्मण एतत् । एतद्रूपं । रूपं यत् । यत्कृष्णाजिनं । कृष्णाजिनं काष्णीं । कृष्णाजिनमितिं कृष्ण-अजिनं । काष्णीं उपानहौं । काष्णीं इति काष्णीं । उपानहावुपं । उपं मुंचते । मुंचते छन्दोंभिः । छन्दोंभिरेव । छन्दोंभिरिति छन्दः-भिः । एवात्मानँ । आत्मानं छादयित्वा । छादयित्वाऽग्निं । अग्निमुपं । उपं चरति । चरत्यात्मनः । आत्मनोऽहिंꣳसायै । अहिंꣳसायै देवनिधिः । देवनिधिर्वै । देवनिधिरितिं देव-निधिः । वा एषः । एष नि । निधींयते । धीयते यत् । यदग्निः । अग्निरन्ये ()

काण्ड -5, प्रपाठक -6, अनुवाक -6, अनुवाक सूक्तम -2,

आग्नेय-काण्डम् -विषयः -अग्निचयन-ब्राह्मणम्,

